श्री संकटनाशन गणेश स्तोत्रम्

Shri Sankat Nashan Ganesh Stotra

Source: Wikimedia Commons — Brihat Stotra Ratnakara 1912 public-domain scan, stable file revision (item 7 on scan page 36). Also compared: Public Domain Mark 1.0; Sanskrit Wikisource — Sankat Nashan Stotra, fixed comparison revision 32845.

VERSE 1

नारद उवाच।
प्रणम्य शिरसा देवं गौरीपुत्रं विनायकम्।
भक्त्या व्यासः स्मरेन्नित्यमायुःकामार्थसिद्धये॥१॥

nārada uvāca |
praṇamya śirasā devaṃ gaurīputraṃ vināyakam |
bhaktyā vyāsaḥ smarennityamāyuḥkāmārthasiddhaye ||1||

VERSE 2

प्रथमं वक्रतुण्डं च एकदन्तं द्वितीयकम्।
तृतीयं कृष्णपिङ्गाक्षं गजवक्त्रं चतुर्थकम्॥२॥

prathamaṃ vakratuṇḍaṃ ca ekadantaṃ dvitīyakam |
tṛtīyaṃ kṛṣṇapiṅgākṣaṃ gajavaktraṃ caturthakam ||2||

VERSE 3

लम्बोदरं पञ्चमं च षष्ठं विकटमेव च।
सप्तमं विघ्नराजं च धूम्रवर्णं तथाष्टमम्॥३॥

lambodaraṃ pañcamaṃ ca ṣaṣṭhaṃ vikaṭameva ca |
saptamaṃ vighnarājaṃ ca dhūmravarṇaṃ tathāṣṭamam ||3||

VERSE 4

नवमं भालचन्द्रं च दशमं तु विनायकम्।
एकादशं गणपतिं द्वादशं तु गजाननम्॥४॥

navamaṃ bhālacandraṃ ca daśamaṃ tu vināyakam |
ekādaśaṃ gaṇapatiṃ dvādaśaṃ tu gajānanam ||4||

VERSE 5

द्वादशैतानि नामानि त्रिसन्ध्यं यः पठेन्नरः।
न च विघ्नभयं तस्य सर्वसिद्धिकरं प्रभो॥५॥

dvādaśaitāni nāmāni trisandhyaṃ yaḥ paṭhennaraḥ |
na ca vighnabhayaṃ tasya sarvasiddhikaraṃ prabho ||5||

VERSE 6

विद्यार्थी लभते विद्यां धनार्थी लभते धनम्।
पुत्रार्थी लभते पुत्रान्मोक्षार्थी लभते गतिम्॥६॥

vidyārthī labhate vidyāṃ dhanārthī labhate dhanam |
putrārthī labhate putrānmokṣārthī labhate gatim ||6||

VERSE 7

जपेद्गणपतिस्तोत्रं षड्भिर्मासैः फलं लभेत्।
संवत्सरेण सिद्धिं च लभते नात्र संशयः॥७॥

japedgaṇapatistotraṃ ṣaḍbhirmāsaiḥ phalaṃ labhet |
saṃvatsareṇa siddhiṃ ca labhate nātra saṃśayaḥ ||7||

VERSE 8

अष्टाभ्यो ब्राह्मणेभ्यश्च लिखित्वा यः समर्पयेत्।
तस्य विद्या भवेत्सर्वा गणेशस्य प्रसादतः॥८॥

aṣṭābhyo brāhmaṇebhyaśca likhitvā yaḥ samarpayet |
tasya vidyā bhavetsarvā gaṇeśasya prasādataḥ ||8||

NARADA PURANA COLOPHON — NOT VERSE 9

इति श्रीनारदपुराणे सङ्कष्टनाशनं नाम गणेशस्तोत्रं सम्पूर्णम्॥

iti śrīnāradapurāṇe saṅkaṣṭanāśanaṃ nāma gaṇeśastotraṃ sampūrṇam ||